Semester -II, CC-3, Section-C, Important Prose romances and fables - Simhasanadwatrimshika

# सिंहासनद्वात्रिंशिका

संस्कृतसाहित्यस्य समृद्धासु शाखासु कथासाहित्यम् भवति अन्यतमम्। भारतवर्षे प्रायेण सर्वेषां मनुष्याणां कथाश्रवणे या प्रवृत्तिः दृश्यते तस्याः एव कथासाहित्यस्य आविर्भावः इति वक्तुं शक्यते। तस्मात् कथानाम् उल्लेखः वेदेषु, पुराणेषु, रामायणे, महाभारते तथा काव्येषु नाटकेषु च दृश्यते। परन्तु उपस्थापनस्य वैचित्र्यवशात् एका अपि कथा वैचित्र्यम् उपादेयत्वं च प्राप्नोति। कथाश्रवणेन मानवां चित्तेषु कश्चित् आनन्दः जायते। न केवलम् एतदेव , अपि तु कथासाहित्येन नीतिशिक्षा अपि प्राप्यते। वेदादिग्रन्थेभ्यः या नीतिशिक्षा लभ्यते सा शिक्षा सर्वदा न तु सुखग्राह्या भवति, विशेषतः बालकानां कृते। परन्तु कथासाहित्येभ्यः या शिक्षा लभ्यते तां शिक्षां तु सर्वे एव सादरं गृह्णति इति कथासाहित्यस्य वैशिष्ट्यम्। संस्कृतसाहित्येषु साहित्यरूपेण याः कथाः प्राप्यन्ते तेषु सिंहासनद्वात्रिंशिका इति कथासाहित्यम् संस्कृतगद्यसाहित्यस्य ऐतिह्यम् तथा अयं ग्रन्थोऽपि भवति पञ्चतन्त्रादिवत् कश्चन माहात्म्यमण्डितो ग्रन्थः।

संस्कृतकथासाहित्यस्य काचित् अमूल्यसम्पद् भवति सिंहासनद्वात्रिंशिका। अस्य ग्रन्थस्य चतुर्धा पाठान्तरम् विद्यते। अस्य कथाग्रन्थस्य अन्यानि नामा नि हि – विक्रमार्कचरितम्, विक्रमचरितम्, द्वात्रिंशत्पुत्तलिका च। ग्रन्थस्य अस्य रचयितृरूपेण कालिदासस्य, वररुचेः, रामचन्द्रस्य, सिद्धसेन-दिवाकरस्य तथा क्षेमेन्द्रस्य क्षेमङ्करस्य च नामानि प्राप्यन्ते। गवेषकाणां मतानुसारम् अस्य कथाग्रन्थस्य प्राचीनः मूलांशः लुप्तः। तथापि विविधेषु संस्करणेषु मूलानुगाः कथाः प्राप्यन्ते। तानि संस्करणानि हि – क्षेमङ्करविरचितम् महाराष्ट्रीयसंस्करणम्,

वररुचिरचितम् वङ्गीयसंस्करणम्। पुनश्च कस्यचित् अपरिचितस्य लेखकस्यापि किञ्चित् संस्करणम् सुलभम् भवति। केषाञ्चित् मते बृहत्कथा भवति अस्य कथाग्रन्थस्य उत्सभूतम्। अस्य ग्रन्थस्य कतासु पञ्चतन्त्रस्य, हितोपदेशस्य, महाभारतस्य, मानवधर्मशास्त्रस्य चाणक्यसूत्रस् च बहवः श्लोकाः सन्निविष्टाः सन्ति।

राजा विक्रमादित्यः नारीमूर्तिरूपविशिष्टं द्वात्रिंशत्पुत्तलिकायुक्तं एकं सिंहासनम् उपहाररूपेण इन्द्रस्य सकाशात् प्राप्तवान्। परन्तु विक्रमादित्यस्य मृत्योः अनन्तरम् तत्सिंहासनम् कालक्रमेण भूमध्ये प्रोथितम् अभवत्। परवर्तिनि काले धाराधिपतिः भोजः मृत्तिकास्तूपतः सिंहासनम् इदम् उद्धृत्य यावत् तत्र आरोढुम् उद्युक्तः अभवत् तावत् सिंहासनगात्रे उत्कीर्णाः द्वात्रिंशत्पुत्तलिकाः एव जीविताः सत्यः प्रत्येकं पुत्तलिका विक्रमादित्यस्य जीवनस्य एकैकां कथां श्रावयित्वा भोजराजम् उद्दिश्य कथितवती यत् स यदि विक्रमादित्यसमगुणस्य अधिकारी भवेत् तदैव स अस्मिन् सिंहासने उपविष्टुम् सक्षमो भवेत्, अन्यथा सिंहासनम् आरुह्यते चेत् तस्य अमङ्गलम् भवेत्। भोजराजः अपि द्वात्रिंशद्दिनषु द्वात्रिंशत्पुत्तलिकाभ्यः नृपतेः विक्रमादित्यस्य गुणराशिं श्रावं श्रावं सिंहासने उपवेशनस्य इच्छां परित्यक्तवान्। द्वात्रिंशत्पुत्तलिकानाम् द्वात्रिंशत्कथासंकलनम् एव सिंहासनद्वात्रिंशिका इति कथाग्रन्थरूपेण परिचीयते।

साहित्यस्य उत्कर्षभावः यद्यपि अस्मिन् ग्रन्थे न दृश्यते, तथापि अत्रत्यकथाभिः लोकायतसमाजस्य रसिकाः पाठकाः आकृष्टाः भवन्ति इति नास्ति संशयः। एतस्मात् एव कारणात् भारतवर्षस् विविधासु भाषासु अस्य कथाग्रन्थस्य अनुवादः अभवत्। अत्र यद्यपि

नीतिकथानां बाहुल्यम् दृश्यते तथापि लोकसमाजेषु अस्य हृदयग्राहित्वं क्रमेण ह्रासं प्राप्नोति इति कथमपि न वक्तुं शक्यते इति शम्॥